# शारदा संस्कृतम्

# 8

## अखिल-ब्रह्माण्डे संस्कृतम्

# शारदा संस्कृतम्

## भाग - 8
## ( कक्षा अष्टमी )


**लेखक-मण्डल**

**जगन्नाथ शर्मा**
अध्यक्ष - ग्रामीण शिक्षा विकास समिति, हरियाणा

**उपेन्द्र कुमार शास्त्री**
प्रधानाचार्य एवं शिक्षा प्रमुख, दिल्ली
उत्तरक्षेत्र संस्कृत संयोजक

**नारायण सिंह**
प्रधानाचार्य, गीता निकेतन आ॰ वि॰, कुरुक्षेत्र
हरियाणा प्रांत संस्कृत संयोजक

**नरेन्द्र पाल**
आचार्य, ल॰ म॰ स॰ बा॰ मं॰ वसन्त विहार
दिल्ली प्रांत संस्कृत संयोजक

**तिरिवीधि साम्ब शिव राव**
आचार्य, स॰ ध॰ स॰ बा॰ मन्दिर,
पंजाबी बाग, दिल्ली

**विकास शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**सुरेन्द्र कुमार**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**भूपेन्द्र शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**डॉ॰ अमित धीमान**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**ज्योति प्रसाद**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र



**विद्या भारती उत्तर क्षेत्र**
नारायण भवन, गीता निकेतन परिसर, कुरुक्षेत्र -136118
दूरभाष : 01744-259941 E-mail : vbukkkr@yahoo.co.in

# प्राक्कथनम्

संसारस्य प्राचीनतमा, श्रेष्ठा, वैज्ञानिकी भाषा संस्कृतम् अनेकासां भाषाणां जननी अस्ति। सङ्गणकस्य कृते सर्वाधिका उपयुक्ता भाषा नूनमेव संस्कृतम्। आधुनिके युगे भविष्यस्य नवमसन्ततेः सङ्गणकस्य (9th generation computer) उत्पादनं संस्कृताधारितम् एव भविष्यति। अत एव वयं वक्तुं शक्नुमः यत् एषा भाषा न केवलं प्राचीनतमा भाषा अपितु आधुनिकी भाषापि अस्ति। उच्यते हि सम्प्रति यत् **'संस्कृतं पठ, आधुनिको भव।'**

एकस्याः आख्यायाः अनुसारेण संस्कृतस्य प्रत्यक्षः अप्रत्यक्षश्च प्रभावः अखिलविश्वस्य प्रायः 97% भाषासु वर्तते। उपर्युक्तकथनेन स्पष्टमेव यत् एषा भाषा सार्वदेशिकी भाषा। पुनः एषा भाषा जनभाषा भवतु, एतस्य कृते मिलित्वा प्रयत्नं कुर्मो वयम्।

बुद्धेः विकासाय संस्कृतमावश्यकम्। विद्या भारती एतां भाषाम् आधारभूतविषयरूपेण मानयति। अस्माकं विद्यालयेषु द्वितीया-कक्षातः संस्कृतस्य अध्यापनं प्रारभते। अस्य कृते बहुभ्यः दिनेभ्यः प्रयासः प्रचलति स्म यत् उत्तरक्षेत्रस्य संस्कृतस्यापि स्वपुस्तकं भवेत्। अस्मिन्नेव क्रमे गतवर्षे द्वितीयातः पञ्चमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानां लेखनम् अभवत्। सम्प्रति षष्ठीतः अष्टमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानि भवतां सुधीजनानां पुरतः वर्तन्ते।

कस्याः अपि भाषायाः चत्वारि कौशलानि वर्तन्ते - श्रवणम्, भाषणम्, पठनं लेखनञ्च। अतः चतुर्णां कौशलानां विकासाय अस्माकं सर्वं कार्यं भवेत्। कक्षायां बहुविध-शिक्षणोपकरणानां सहायताभिः अध्यापनं भवेत्। कक्षासु प्रत्यक्षविधिना, विभिन्नवस्तूनां प्रदर्शनमाध्यमेन, स्फोरक-पत्राणाम् उपयोगेन, प्रश्नोत्तर-माध्यमेन, वार्तालापैः, सम्भाषणमाध्यमेन निरन्तरम् अध्यापनं भवेत्, येन छात्राः संस्कृतसम्भाषणे दक्षाः भवेयुः। अपि च कक्षासु अध्यापनं गतिविध्याधारितं छात्रकेन्द्रितञ्च भवेत् । आचार्यः प्रत्येकं पाठस्य स्वसुविधानुसारेण 'पॉवर पॉईंट' प्रदर्शनस्य (PPT) स्तरानुसारं सम्यग्रूपेण निर्माणं कृत्वा अध्यापनं कारयेत् ।

समये-समये संस्कृतवस्तु-प्रदर्शनी, सज्जपट्टे संस्कृतलेख-प्रदर्शनम्, कक्षाकार्यप्रदर्शनाय समुचिता व्यवस्था, भित्तिलेखः, सम्भाषणप्रतियोगिता, संस्कृतगीतगायनम्, श्लोकगायनम्, सुभाषितलेखन-प्रतियोगिता, संस्कृतसुलेख-प्रतियोगिता, सम्भाषण-प्रतियोगिता, गीतापाठ-प्रतियोगिता, प्रश्नमञ्च-प्रतियोगिता चादयः स्वव्यवस्थानुसारम् अवश्यमेव कारणीयाः। विद्यालये संस्कृतमय-वातावरणस्य निर्माणार्थं संस्कृताचार्यैः सदैव प्रयत्नो विधेयः।

बहुविधप्रयासेन संस्कृतं संस्कृतमाध्यमेन अध्यापनार्थं सम्भाषणाधारेण सरलभाषया च प्रस्तुतमिदं पुस्तकं भवतां सम्मुखम् अस्ति। षष्ठीतः अष्टमीपर्यन्तं संस्कृत-पुस्तकस्य कृते क्षेत्रस्य एषः प्रथमः प्रयासः अस्ति। अत एव त्रुटेः सम्भावना तु वर्तते एव। भवादृशान् सुधीजनान् निवेदयामः यत् आगामि-संस्करणस्य कृते प्रस्तुतपुस्तक-विषयकस्वविचारान् प्रेषयन्तु भवन्तः। भवतां सुधीजनानां विचाराः नूनमेव आगामिसंस्करणस्य कृते उपयोगिनः भविष्यन्ति।

पुस्तकनिर्माणे विद्याभारत्याः अधिकारिणां महत् योगदानं प्राप्तम्। तथैव सुन्दरचित्राणां द्वारा पुस्तकस्य आकर्षणं वर्धितवन्तौ गीतानिकेतनविद्यालयस्य कलाचार्यौ नितेशकुमारः सुरेन्द्रसिंहः च। पुस्तकस्य सर्वं टङ्कणकार्यं महता हर्षेण कृतवान् सत्येन्द्रः। एतेभ्यः सर्वेभ्यः सादरं कृतज्ञताम् अर्पयामि।

**शृणुत संस्कृतम् ! वदत संस्कृतम् !! पठत संस्कृतम् !!! लिखत संस्कृतम् !!!!**
**लसतु च संस्कृतं गृहे-गृहे च पुनरपि।**
**जयतु संस्कृतम्। जयतु भारतम्**

**विदुषां पदकिङ्करः**
**उपेन्द्र-कुमार-शास्त्री**
**उत्तरक्षेत्र-संस्कृत-संयोजकः**

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | मङ्गलाचरणम् | 04 |
| 01. | प्रथमः पाठः | मित्र-संलापः | 05 |
| 02. | द्वितीयः पाठः | लोभः नाशस्य कारणम् | 09 |
| 03. | तृतीयः पाठः | मनुर्भव | 12 |
| 04. | चतुर्थः पाठः | विद्याधनं सर्वधनप्रधानम् | 15 |
| 05. | पञ्चमः पाठः | वन्दनीया वृक्षमाता | 18 |
| 06. | षष्ठः पाठः | बुद्धिर्यस्य बलं तस्य | 21 |
| 07. | सप्तमः पाठः | सा विद्या या विमुक्तये | 24 |
| 08. | अष्टमः पाठः | पुत्री संरक्षणीया | 27 |
| 09. | नवमः पाठः | श्रेष्ठः व्यापारः | 31 |
| 10. | दशमः पाठः | मैत्रीं सदा समादर | 34 |
| 11. | एकादशः पाठः | अहो! विज्ञानेन उपकृताः वयम् | 37 |
| 12. | द्वादशः पाठः | त्रयः धूर्ताः | 40 |
| 13. | त्रयोदशः पाठः | हॉकी-ऐन्द्रजालिकः ध्यानचन्दः | 44 |
| 14. | चतुर्दशः पाठः | सुन्दरसुरभाषा | 47 |
| | | परिशिष्टम् | 48 |

# मङ्गलाचरणम्



ओ३म् प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रं हुवेम् ॥ ( ऋग्वेद - 7/14/1 )
प्रातःकाल की मधु-बेला में, शरण तुम्हारी आए हैं,
अग्नि, इन्द्र तुम मित्र, वरुण, तुम भक्तिभाव उमगाए हैं।
वेद के स्वामी अमृतसागर! बुद्धि में संज्ञान भरो,
हे पालक परमेश्वर! मेरे सारे संकट दूर करो।
ओ३म् यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ( यजुर्वेद - 34/1 )
प्रभो जागते हुए सदा जो, दूर दूर तक जाता है,
सोते में भी दिव्य शक्तिमय, कोसों दौड़ लगाता है।
दूर दूर वह जाने वाला, तेजों का भी तेजनिधान,
नित्य युक्त शुभ सङ्कल्पों से, वह मन मेरा हो भगवान् ॥

**प्रथमः पाठः**

# मित्रसंलापः



(ग्रीष्मावकाशः समाप्तः। अद्य विद्यालयस्य प्रथमः दिवसः।
सर्वे छात्राः भ्रमणस्य विषये वार्तालापं कुर्वन्ति।)

सौम्यः – नमो नमः। सर्वं कुशलम्?

तनुजः – आम्, सर्वं कुशलम्।

सौम्यः – भोः निखिल! ग्रीष्मावकाशे भवान् भ्रमणार्थं कुत्र गतवान् ?

निखिलः – अहं मम पित्रा सह देहलीं गतवान्।

तनुजः – देहली तु विशालं महानगरम् अस्ति। बहु सुन्दरम् अपि अस्ति।

हर्षितः – भवान् तत्र किं-किं दृष्टवान्?

निखिलः – अहं तत्र रक्तदुर्गम्, संसदभवनम्, राष्ट्रपतिभवनम् अक्षरधाममन्दिरं च दृष्टवान्। तत्र बहूनि दर्शनीयस्थलानि सन्ति।

सौम्यः – तर्हि किमर्थं सर्वाणि स्थलानि न दृष्टवान्?

निखिलः – तत्र गत्वा मम स्वास्थ्यं विकृतम् अभवत्। यतोहि तस्मिन् महानगरे अधिकं प्रदूषणम् अस्ति।

तनुजः – आम्-आम् । अतः एव मम माता मां मातुलस्य गृहं चण्डीगढं नीतवती। मम मातुलः चण्डीगढनगरे वसति। तत्रत्यं वातावरणम् अतीव स्वच्छम् अस्ति।

हर्षितः – भोः सौम्य! भवान् भ्रमणार्थं कुत्र गतवान्?

सौम्य: – अहं निज-परिवारेण सह शिमलानगरं गतवान्।

हर्षित: – शिमलानगरं तु बहु रमणीयम् अस्ति। सर्वत्र हरीतिमा अस्ति। अहं दूरदर्शने दृष्टवान्।

निखिल: – आम्-आम्। तत्र ग्रीष्मकाले अपि शैत्यं भवति।

तनुज: – तत्र हिमपात: अपि भवति?

हर्षित: – हिमपात: तु केवलं शीतकाले भवति।

सौम्य: – आम्-आम्, हर्षित: सत्यं वदति। शिमलानगरं बहु सुन्दरम् अस्ति। परन्तु पर्वतीयजीवनं किञ्चित् कठिनं भवति।

निखिल: – हर्षित: तु मन्ये कुत्रापि न गतवान्।

हर्षित: – मित्राणि एवं नास्ति। अहं मम पितामहेन सह अस्माकं ग्रामं गतवान्। मम पितृव्य: तत्र निवसति। अहं चत्वारि दिनानि तत्रैव निवासं कृतवान्।

तनुज: – ग्रामे किं दर्शनीयम् अस्ति?

हर्षित : – ग्रामे सुन्दराणि क्षेत्राणि, हरिता: वृक्षा:, जलपूर्ण: तडाग:, स्वच्छा नदी बहव: पशव: च भवन्ति। ग्रामस्य वातावरणम् अतीव स्वच्छं भवति।

निखिल: – ग्रामे चिकित्साया: शिक्षाया: च अभाव: भवति।

हर्षित: – एवं नास्ति भो:! अद्यत्वे ग्रामे अपि सर्वविधा: सुविधा: सन्ति। अस्माकं ग्रामे एक: उच्चविद्यालय:, एक: चिकित्सालय:, एकं सुन्दरम् उद्यानं च अस्ति। ग्रामे सर्वे जना: मिलित्वा आनन्देन जीवनयापनं कुर्वन्ति।

सौम्य: – रविवासरे वयमपि भवत: ग्रामं गन्तुम् इच्छाम:।

हर्षित: – आम्-आम्। भवतां सर्वेषां स्वागतम्।

**आचार्याय** – अस्माकं छात्रा: सम्भाषणशीला: भवेयु: इति अस्माकं ध्येयम्। अत: संवादात्मक: पाठ: अयं छात्रेषु रुचिम् उत्पादयिष्यति इति विचार:। अत: आचार्य: बहु रुचिकरान् अन्यान् संवादान् पाठयतु एवं च छात्रा: परस्परं सम्भाषणं कुर्वन्तु इति प्रयत्नं करोतु। न्यूनातिन्यूनं स्वपरिचयात्मक-दश-वाक्यानाम् अभ्यासं छात्रा: कुर्वन्तु, एतादृश: वातावरण: कक्षायां भवतु इति।

**शब्दार्था:** – **वार्तालापम्** – बातचीत, **भ्रमणार्थम्** – घूमने के लिए, **गतवान्** – गया, **महानगरम्** – बड़ा शहर, **दर्शनीयम्** – देखने योग्य, **दृष्टवान्** – देखा, **तर्हि** – तो, **विकृतम्** – बिगड़ गया, **रक्तदुर्गम्** – लाल किला, **नीतवती** – ले गई, **तत्रत्यं** – वहाँ का, **रमणीयम्** – रमण करने योग्य (सुन्दर), **हरीतिमा** – हरियाली (हरा-भरा), **हिमपात:** – बर्फ़ का गिरना, **सर्वविधा:** – सभी प्रकार की, **मिलित्वा** – मिलकर।

# अभ्यासकार्याणि

**1. एकपदेन उत्तरत –**

(क) पित्रा सह देहलीं कः गतवान्? ..................................................

(ख) कस्मिन् नगरे प्रदूषणम् अधिकम् अस्ति? ..................................................

(ग) सौम्यः भ्रमणार्थं कुत्र गतवान्? ..................................................

(घ) हिमपातः कदा भवति? ..................................................

(ङ) हर्षितः भ्रमणार्थं कुत्र गतवान्? ..................................................

(च) ग्रामे सर्वे जनाः मिलित्वा आनन्देन किं कुर्वन्ति? ..................................................

**2. पूर्णवाक्येन उत्तरत–**

(क) निखिलः देहलीं गत्वा किं-किं दृष्टवान्?

..................................................................................................................

(ख) केन कारणेन निखिलस्य स्वास्थ्यं विकृतम् ?

..................................................................................................................

(ग) सौम्यः शिमलानगरस्य विषये किं वदति?

..................................................................................................................

(घ) ग्रामे किं-किं भवति?

..................................................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) निखिलः **पित्रा** सह देहलीं गतवान्। ..................................................

(ख) देहली **विशालं** महानगरम् अस्ति। ..................................................

(ग) निखिलः तत्र **राष्ट्रपतिभवनं** दृष्टवान्। ..................................................

(घ) तत्र गत्वा मम **स्वास्थ्यं** विकृतम्। ..................................................

(ङ) सर्वत्र **हरीतिमा** अस्ति। ..................................................

(च) **ग्रामस्य** वातावरणम् अतीव स्वच्छं भवति। ..................................................

**4. विशेषणैः विशेष्याणि मेलयत –**

| | | विशेषणानि | विशेष्याणि |
|---|---|---|---|
| (क) प्रथमः | (i) पशवः | ...................... | ...................... |
| (ख) विशालं | (ii) दिवसः | ...................... | ...................... |
| (ग) रमणीयं | (iii) महानगरम् | ...................... | ...................... |
| (घ) चत्वारि | (iv) शिमलानगरम् | ...................... | ...................... |
| (ङ) बहवः | (v) दिनानि | ...................... | ...................... |

5 **कः कं प्रति कथयति –**

| | कः | कं प्रति |
|---|---|---|
| (क) देहली तु विशालं महानगरम् अस्ति। | ................................ | ................................ |
| (ख) भवान्! तत्र किं-किं दृष्टवान्? | ................................ | ................................ |
| (ग) तर्हि किमर्थं सर्वाणि स्थलानि न दृष्टवान्? | ................................ | ................................ |
| (घ) तत्र गत्वा मम स्वास्थ्यं विकृतम्। | ................................ | ................................ |
| (ङ) ग्रामे किं दर्शनीयम् अस्ति? | ................................ | ................................ |
| (च) आम्-आम्, भवतां सर्वेषां स्वागतम्। | ................................ | ................................ |

6. **निम्नलिखित-शब्दानां विभक्तिं वचनं च लिखत –**

| शब्दाः | विभक्तिः | वचनम् |
|---|---|---|
| **यथा** – अवकाशे | सप्तमी | एकवचनम् |
| (क) देहलीम् | ...................... | ...................... |
| (ख) पित्रा | ...................... | ...................... |
| (ग) भवान् | ...................... | ...................... |
| (घ) महानगरे | ...................... | ...................... |
| (ङ) मातुलस्य | ...................... | ...................... |
| (च) भूमेः | ...................... | ...................... |
| (छ) पशवः | ...................... | ...................... |
| (ज) भवतः | ...................... | ...................... |

**अतिरिक्त-अभ्यासः**

7. **एकतः चतुर् पर्यन्तं ( 1-4 ) संख्यावाचीशब्दाः त्रिषु लिङ्गेषु भवन्ति।**

| संख्या | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| 1. | एकः | एका | एकम् |
| 2. | द्वौ | द्वे | द्वे |
| 3. | त्रयः | तिस्रः | त्रीणि |
| 4. | चत्वारः | चतस्रः | चत्वारि |

**उदाहरणानि**

| | | | |
|---|---|---|---|
| (क) | एकः बालकः | (क) एका बालिका | (क) एकं पुस्तकम् |
| (ख) | द्वौ बालकौ | (ख) द्वे बालिके | (ख) द्वे पुस्तके |
| (ग) | त्रयः बालकाः | (ख) तिस्रः बालिकाः | (ग) त्रीणि पुस्तकानि |
| (घ) | चत्वारः बालकाः | (घ) चतस्रः बालिकाः | (घ) चत्वारि पुस्तकानि |

द्वितीयः पाठः

# लोभः नाशस्य कारणम्



एकस्मिन् ग्रामे धर्मबुद्धिः पापबुद्धिश्च वसति स्म। स्वभावेन धर्मबुद्धिः दयालुः एवञ्च पापबुद्धिः दुष्टः आसीत्। एकदा पापबुद्धिः अचिन्तयत् यत् सः धर्मबुद्धेः सहायतया धनस्यार्जनं सरलतया कर्तुं शक्नोति। एतत् विचिन्त्य सः धर्मबुद्धेः समीपं गत्वा अकथयत् – भोः मित्र! वृद्धावस्थायां किं त्वम् आत्मविचेष्टितं स्मरसि, विदेशगमनं विना बालकान् कां वार्तां कथयिष्यसि?

उक्तं च –

**देशान्तरेषु बहुविधभाषा, वेशादि येन न ज्ञातम् ।**
**भ्रमता धरणीपीठे, तस्य फलं जन्मनो व्यर्थम् ॥**



अनेन धर्मबुद्धिः तस्य विचारं मत्वा धनार्जनहेतोः विदेशं प्रति गच्छति। तत्र विपुलं धनार्जनं कृत्वा तौ पुनः स्वदेशं आगच्छतः। पापबुद्धिः अत्यधिकः चतुरः आसीत्। सः अकथयत् – भोः मित्र! सर्वं धनं गृहे न नेष्यावः यतोहि अस्माकं बान्धवाः धनं याचिष्यन्ते। अतः अत्रैव वृक्षस्य अधः धनं निगुह्य किञ्चिद् च धनम् आदाय गृहं प्रविशावः। तौ तथा कृत्वा गतौ। अग्रिमे दिने अवसरं लब्ध्वा पापबुद्धिः निजधनम् एवञ्च धर्मबुद्धेः अपि धनं गृहीत्वा आगतः। अनन्तरं धर्मबुद्धिः तत्र धनं न प्राप्य पापबुद्धिं पृच्छति। परञ्च पापबुद्धिः कथयति – त्वया धनं चोरितं न तु मया।



विवदमानौ तौ धर्माधिकारिणम् उपगतौ। सर्वे अधिकारिणः एवञ्च तौ द्वौ तस्य वृक्षस्य समीपं गच्छन्ति। वृक्षस्य कोटरे पापबुद्धेः पिता योजनानुसारेण पूर्वमेव स्थितः आसीत्। यदा अधिकारिणः वृक्षं पृच्छन्ति यत् एतयोः द्वयोः कः चौरः? पापबुद्धेः पिता वृक्षवाण्याम् अवदत् – अहं सर्वं जानामि। एषः धर्मबुद्धिः एव चौरः नात्र कोऽपि सन्देहः। एतत् श्रुत्वा तत्रोपस्थिताः सर्वे जनाः आश्चर्यचकिताः अभवन्; परन्तु धर्मबुद्धिः विचारयति यत् वृक्षः कथं वक्तुं शक्नोति ? निश्चयेन अत्र किमपि

रहस्यम् इति विचार्य धर्मबुद्धिः तं वृक्षं वह्निना ज्वालयति। वह्नेः कारणेन अर्धदग्धशरीरयुक्तः पापबुद्धेः पिता वृक्षात् बहिः आगच्छत्। सः दुःखी हृदयेन सर्वं सत्यं वृत्तान्तं कथयित्वा मृतः। पापबुद्धिः अपि मृतपितरं दृष्ट्वा पश्चात्तापम् अकरोत्। सर्वे जनाः मुक्तकण्ठेन धर्मबुद्धेः प्रशंसां कुर्वन्ति कथयन्ति च –

**पापिनाञ्च सदा दुःखं, सुखं वै पुण्यकर्मणाम् ।**
**एवं स्थिरतरं ज्ञात्वा, साधुवृत्तिं समाचरेत् ॥**

**शब्दार्थाः** – **स्वभावेन** – स्वभाव से, **अचिन्तयत्** – सोचा, **मत्वा** – मानकर, **आत्मविचेष्टितं** – ठगा हुआ, **ज्ञातम्** – समझा, **निगुह्य** – छिपाकर, **आदाय** – लेकर, **विवदमानौ** – झगड़ते हुए, **अर्धदग्धः** – आधा जला हुआ, **वृत्तान्तम्** – घटना, **दृष्ट्वा** – देखकर, **देशान्तरेषु** – विदेशों में, **धरणीपीठे** – पृथ्वी पर, **लब्ध्वा** – प्राप्त करके, **गृहीत्वा** – ग्रहण करके

## अभ्यासकार्याणि

**1. एकपदेन उत्तरत –**

(क) धर्मबुद्धिः स्वभावेन कीदृशः आसीत्? ............................................

(ख) वृक्षस्य कोटरे कः स्थितः आसीत्? ............................................

(ग) धर्मबुद्धिः कं वह्निना ज्वालयति? ............................................

(घ) धनार्जनं कृत्वा तौ कुत्र आगच्छतः? ............................................

(ङ) पापबुद्धिः कं दृष्ट्वा पश्चात्तापम् अकरोत्? ............................................

**2. पूर्णवाक्येन उत्तरत उत्तरपुस्तिकायां च लिखत –**

(क) धर्मबुद्धिः किमर्थं विदेशं प्रति गच्छति?

..........................................................................................................

(ख) पापबुद्धेः पिता वृक्षवाण्यां किम् अवदत्?

..........................................................................................................

(ग) तौ कुत्र धनं निगुह्य गृहं प्रविशतः?

..........................................................................................................

(घ) कदा सर्वे आश्चर्यचकिताः अभवन्?

..........................................................................................................

**3. उचितविकल्पं चित्वा रिक्तस्थानानि पूरयत –**

(क) विवदमानौ ........................ धर्माधिकारिणं प्रति गतौ। (तौ, सः)

(ख) पापबुद्धिः ........................ चतुरः आसीत्। (न्यूनम्, अत्यधिकः)

(ग) अहं सर्वं ........................। (जानाति, जानामि)

(घ) सर्वं …………………… कथयित्वा सः मृतः। (कथां, वृत्तान्तम्)

(ङ) पापीनाञ्च सदा …………………… । (दुःखं, सुखं)

## 4. उदाहरणानुसारं प्रकृतिं प्रत्ययं च विभज्य लिखत –

**यथा** – श्रुत्वा = श्रु + क्त्वा

(क) गत्वा – ………………………… + …………………………

(ख) मत्वा – ………………………… + …………………………

(ग) कृत्वा – ………………………… + …………………………

(घ) लब्ध्वा – ………………………… + …………………………

(ङ) गृहीत्वा – ………………………… + …………………………

(च) दृष्ट्वा – ………………………… + …………………………

## 5. विशेष्यपदैः सह विशेषणानि मेलयत –

| | विशेष्यपदानि | | विशेषणपदानि | | |
|---|---|---|---|---|---|
| (i) | धर्मबुद्धिः | (क) | विपुलं | ……………………… | ……………………… |
| (ii) | धनम् | (ख) | दुष्टः | ……………………… | ……………………… |
| (iii) | जनाः | (ग) | सत्यं | ……………………… | ……………………… |
| (iv) | पापबुद्धिः | (घ) | आश्चर्यचकिताः | ……………………… | ……………………… |
| (v) | वृत्तान्तम् | (ङ) | दयालुः | ……………………… | ……………………… |

## 6. घटनाक्रमानुसारेण वाक्यानि पुनः लिखत –

(क) पापबुद्धिः अत्यधिकः चतुरः आसीत्।

(ख) एकस्मिन् ग्रामे धर्मबुद्धिः पापबुद्धिश्च वसति स्म।

(ग) एतत् श्रुत्वा तत्रोपस्थिताः सर्वे जनाः आश्चर्यचकिताः अभवन्।

(घ) सः दुःखीहृदयेन सर्वं सत्यं वृत्तान्तं कथयित्वा मृतः।

(ङ) धर्मबुद्धिः तत्र धनं न प्राप्य पापबुद्धिं पृच्छति।

(च) सर्वे जनाः आश्चर्यचकिताः अभवन्।

(i) …………………………………………………………………………………

(ii) …………………………………………………………………………………

(iii) …………………………………………………………………………………

(iv) …………………………………………………………………………………

(v) …………………………………………………………………………………

(vi) …………………………………………………………………………………